SANATANODAYA सनातनोदय
ISSN (O) : 3048-9318
Vol. 1, No. 1, Year 2024
Available Online : https://sanatanodaya.com/

# वर्तमानप्रसङ्गे श्रीमद्भगवद्गीतायाः प्रासङ्गिकता

(देविका दासः)

निबन्धसारः -

अस्मिन् शोधपत्रे श्रीमद्भगवद्गीतायाः उपयोगिता पुरस्सरं मानवकल्याणे सामाजिकजीवने लोकहिते च तेषां महत्त्वमुपादेयता च प्रदर्शिता। गीतायां भगवता श्रीकृष्णेन अर्जुनं प्रति ये उपदेशा प्रदत्तास्ते मानवजीवने पाल्यन्ते चेत् जीवनयापनं कथं सुष्ठु सुन्दरं शान्तिमयं च भवेत् तदेव तत्त्वं प्रतिपाद्यते निबन्धेनानेन।

- भूमिका -

वैदिकसनातनधर्मानुसारिणां परमप्रमाणभूतो वेदो भवति। वेद एव धर्मतत्त्वस्य ब्रह्मतत्त्वस्य च आश्रयस्वरूपः। संहिता-ब्राह्मण-आरण्यक-उपनिषदभिप्रायेण वेदस्य चतुर्विभागाः विद्यन्ते। कर्मकाण्ड-उपासनाकाण्ड-ज्ञानकाण्डभेदेन वेदस्य काण्डत्रयं वर्तते। स्वार्थपरार्थपरमार्थसाधनक्षमं लोकपरलोकपरमात्मतत्त्वरहस्यज्ञानजनकं च ज्ञातृत्वं ज्ञानकाण्डम् । वेदस्य ज्ञानकाण्डम् उपनिषद्भागमाश्रित्य वेदान्तशास्त्रं प्रणीतम्। वेदान्तशास्त्रे श्रुतिस्मृतिन्यायाख्येषु प्रस्थानत्रयेषु स्मृतिप्रस्थाने मूर्धन्यभूता अद्वैतामृतवर्षिणी भवभयहारिणी भागवती श्रीमद्भगवद्गीता। महाभारते भीष्मपर्वे पञ्चविंशतितः द्विचत्वारिंशत्पर्यन्तम् अष्टादशाध्याये वेदव्यासेन भगवदुपदिष्टा उपदेशाः सप्तशतश्लोकैः निबद्धाः। गीताया उपदेष्टा भवति भगवान् श्रीकृष्णः श्रोता च अर्जुनः।

- गीतायाः महत्त्वम् -

प्राचीनभारतीये आस्तिकदर्शनस्य नीतितत्त्वस्य धर्मसाधनायाश्च विविधतत्त्वस्य संकलनं समन्वयश्च गीतायाः मूलविषयः। सर्वा उपनिषदः संगृह्य भगवता सरलया भावाभिव्यक्तिप्रक्रियया अर्थगभीरया दार्शनिका वेदान्तप्रतिपाद्या विषया अर्जुनं प्रत्युपदिष्टाः। अत उच्यते-

“सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।

पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।” इति।

आत्मनः अविनश्वरत्वम्, निष्कामकर्मयोगः ,सम्यक्तया ईश्वरे आत्मसमर्पणञ्चेति वचनत्रयं गीतायाः मूलम्। श्रीमद्भागवते भगवान् प्राह – “योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।

ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योस्ति कुत्रचित्।।”(११।२०।६) इति।

अतएव ज्ञानयोगं कर्मयोगं भक्तियोगञ्चेति आश्रित्य केऽपि जीवनयापनं आचरन्ति पाल्यन्ते चेन्मानवजीवनं कल्याणं भवेत्।

क. स्वधर्मपरिपालनम् –

ब्राह्मणादिचतुर्वर्णानां ब्रह्मचर्यादिचतुर्णाम् आश्रमानां स्वस्वधर्मः अस्ति। स्वधर्मानुसारम् अस्माभिः कार्यं करणीयम्। परन्तु वर्तमानकाले दृश्यते यत् बहवः जनाः कार्येषु स्वकर्तव्यं न पालयन्ति। तेन सर्वत्र विशृङ्खला उत्पद्यते। ये कर्तव्यं सम्यक्पालयन्ति तेषां जीवनं सुन्दरं शान्तिमयं च भवति। अतएव स्वकर्तव्यपालनेनैव जीवनस्य साफल्यं सिद्धिलाभं च भवति। अतः भगवता भणितम्-“स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।(१८।४५) इति। अपि च स्वधर्मविषये भगवान् उपदिशति सर्वान्-

“श्रेयान्स्वधर्मे विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।।(३।३५) इति।

ख. निष्कामकर्म -

जगति फलाकाङ्क्षा एव समेषां दुःखानां बीजं भवति। कर्मणः फलाकाङ्क्षां विहाय यत्कर्म भवति तत्कर्म निष्कामकर्म। अतएव फलाकाङ्क्षां त्यक्त्वा अस्माभिः निष्कामकर्मकरणेनैव सुखं लभ्यते। अतः भगवता उक्तम्-“कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।”(२।४७) इति। कर्मयोगे भगवान् मधुसूदन अर्जुनम् उपदिशति यत् -“लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि”।(३।२०) इति। अतः संसारे लोकहिताय लोकसंग्रहार्थं निष्कामकर्म करणीयम्। यतः समाजे ये श्रेष्ठा भवन्ति तेषामेव अनुसरणं साधारणैः जनैः विधीयते। ते सज्जना भवन्ति चेत् लोकः अपि सदाचारं कुर्वन्ति। एतस्मात्प्राह भगवान् –

“यद्यदाचरति श्रेष्टस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।”(३।२१) इति।

ग. कामक्रोधलोभत्यागः –

कामः क्रोधः लोभश्चेति त्रिविधं नरकस्य द्वारम्। त्रिविधेषु काम एव प्रधानम्। यतः विषयभोगचिन्तने तद् विषयं प्रति आसक्तिः उपजायते। आसक्तेः सञ्जायते कामः। कामात् अभिजायते क्रोधः। क्रोधात् सम्मोहः भवति। सम्मोहात् स्मृतिविभ्रमः जायते। स्मृतिभ्रंशात् बुद्धिनाशः। बुद्धिनाशात् प्रणश्यति। अतः कामक्रोधलोभास्तु अनर्थकारका एव। तस्मात् त्यागात् अस्माकं मानसिकी सामाजिकी आत्यन्तिकी चोन्नतिः स्यादन्यथा नाशस्तु ध्रुव एव। केऽपि रागद्वेषवियुक्तैः आत्मवश्यैः इन्द्रियैः विषयान् उपभुञ्जते चेत् प्रसादं लभ्यते। अतः भगवान् प्राह –

“विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति।।”(२।७१) इति।

घ. परार्थाय चिन्तनम् -

सर्वदा परहिताय कार्यं करणीयम्। ये आत्मकारणात् कर्म कुर्वन्ति ते पापाः अघं प्राप्नुवन्ति। एतस्मिन् विषये भगवान् गीयायां कर्मयोगे प्राह - "भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्।"(३।१३) इति। भगवान्नपि सर्वदा लोकहिताय कर्मणि निरतः। अतः कर्मयोगे भगवता श्रीकृष्णेन भणितम् –

"न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि।।"(३।२२) इति।

अतएव यैः जनैः अन्येषां पीडाकारणं न भवति चेत् ते एव भगवतः प्रियो भवति। एतस्मिन् विषये भगवान् गीयायां भक्तियोगे प्राह -

"अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी।।"(१२।१३) इति।

अपि च,

"सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः।।"(१२।१४) इति।

ङ. दैवीसम्पल्लाभः आसुरसम्पत्परित्यागश्च –

षोडशोऽध्याये दैवासुरसम्पद्विभागयोगे भगवता श्रीकृष्णेन दैवासुरसम्पद्भेदः सम्यक्तया वर्णिताः। दैवीसम्पल्लाभार्थं भगवान् अर्जुनम् उपदिशति। दैवीसम्पद्स्वरूपम् एवं नारायणेन उक्तम् -

"अभयं सत्त्वसंशूद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।।"(१६।१) इत्यादिश्लोकत्रयेण।

दम्भः, दर्पः, अभिमानः, क्रोधः, पारुष्यमज्ञानञ्च आसुरी सम्पदित्युच्यते। अतः अस्माभिः दैवीसम्पल्लाभाय तथा आसुरसम्पत्त्यागाय यत्नः करणीयः। यतः आसुरीसम्पद् संसारबन्धनस्य हेतुः। अतः भगवान् प्राह - "दैवीसम्पद्विमोक्षाय निबन्धायासुरी मता।"(१६।५) इति।

- उपसंहारः -

वर्तमानकाले बहवः विशृङ्खला दरीदृश्यन्ते। लोभ-हिंसा-निग्रह-उद्वेग-अपहरण-अश्लीलाचरण-नीतिहीनता-मात्स्यन्याय-सन्त्रासवाद-भ्रष्टाचारप्रभृतयः तासु अन्यतमाः। अतः आसां विशृङ्खलानां निवारणार्थं श्रीमद्भगवद्गीतामाश्रित्य कर्म करणीयम्। तेन समाजकल्याणकारकं लोकहितकारकं च भवेत्। न केवलं आध्यात्मिकक्षेत्रे अपि तु धर्मक्षेत्रे राजनीतिक्षेत्रे नीतिशास्त्रे चेत्यादिसर्वत्र गीताया अवदानं महत्। अतएव अन्ते एवं वक्तुं शक्यते -

"गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।

या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता।।"

इत्यलं विस्तरेणेति शम्।

तथ्यसूची -

१. दास, देवकुमार : संस्कृत साहित्येर इतिहास,सदेश,१४१९,कोलकाता।
२. वन्द्योपाध्याय,मानवेन्दु : मनुसंहिता, संस्कृत पुस्तक भाण्डार,१४१६,कोलकाता।
३. वन्द्योपाध्याय,मानवेन्दु; वन्द्योपाध्याय,अशोककुमार : कौटिलीय अर्थशास्त्र,सदेश,१४१०,कोलकाता।
४. वासुदेवानन्द : श्रीमद्भगवद्गीता,उद्बोधन कार्यालय,पु.मु.२०१९,कोलकाता।
५. मण्डल,अजितकुमार : संस्कृत साहित्य सारांश,पाण्डुलिपि,२०१३,कोलकाता।
६. रामसुखदास : श्रीमद्भगवद्गीता,गीताप्रेस, पु.मु.२०१९,गोरक्षपुर।